च। व्याहृतञ्च पराहृतम् पादोद्धृतमवप्लुतम्। हंसमार्गं विमार्गञ्च गदाकर्म्म प्रकीर्त्तितम्"। तत्रैवा-नतिदूरे च "सव्यासव्यवदङ्गञ्च वराहोद्धृतकं तथा। हस्तावहस्तपालीनमेकहस्तावहस्तके। द्विहस्तबाहुपाशे च कटिरेचितकोद्गते। भव्ये ललाटघाते च भुजावि-धमनं तथा। करोद्धूतं विमानञ्च पादाहतविपादकम्। गात्रसंप्रेषणं क्रान्तं तथागात्रविपर्य्ययम्। ऊर्द्ध्वप्रहारं घातञ्च गोमूत्रं सव्यदक्षिणे। पादसन्ताड़नं मण्डं कवचं विषमाकुलम्। तिर्य्यक्स्थमपाघातं भीमवेगप्रदर्श-नम्। सिंहाक्रान्तं गजाक्रान्तं गर्द्दभाक्रान्तमेव च। गदाकर्म्माणि जानीयात्"। भा० शल्य० गदा पर्वणि ५७अ० तु अन्यथैव प्रकारो दर्शितः यथा "अचरद्भीमसेनस्तु मार्गान् बहुविधांस्तथा। मण्ड-लानि विचित्राणि गतप्रत्यागतानि च। अस्त्रय-न्त्राणि चित्राणि स्थानानि विविधानि च। परिमोक्षं प्रहाराणां वर्जनं परिधावनम्। अभिद्रवणमाक्षेप-मवस्थानं सविग्रहम्। परिवर्त्तनसंवर्त्तमवप्लुतमुपप्लु-तम्। उपन्यस्तमपन्यस्तं गदायुद्धविशारदौ। एवन्तौ विचरन्तौ तु न्यघ्नतां वै परस्परम्"। "मण्डलानि शत्रोः परिवेष्टनानि परितो भ्रमणानि। गतं शत्रोः सम्मुख-गमनं प्रत्यागतम् चाभिमुख्येन तत एवापसरणम्। अस्त्र-यन्त्राणि कठिनमर्म्मदेशमाचिप्य येन शत्रोरुत्क्षेपणमप-क्षेपणं च क्रियते तदस्त्रयन्त्रम् अस्यते क्षिप्यतेऽनेनेत्यस्त्रं तस्य तद्यन्त्रं नियन्त्रणम् चास्त्रयन्त्रमिति समासः। स्था-नानि तेषामेवोपयोगीनि मर्म्मदेशादीनि परिधावनं वे-गेन सव्यापसव्यकरणम्। अभिद्रवणं वेगेनाभ्यागमनम् आक्षेपं परयत्नस्य तत्पातनहेतुतासम्पादनम्। अवस्थान-मचाञ्चल्यं सविग्रहं शत्रावुत्थिते पुनस्तेन सहयुद्धकरणं परिवर्त्तनं शत्रुं प्रहर्त्तुं परितः प्रसरणं, संवर्त्तं शत्रु-प्रसरणस्यावरोधनम् अवप्लुतं प्रहारवञ्चनार्थं नम्रीभावेन निःसरणम् उपप्लुतं तदेवार्वाग्गमनयुक्तम्। उपन्यस्तं उपेत्यायुधप्रक्षेपः अपन्यस्तं परावृत्य पृष्ठतः कृतेन ह-स्तेन शत्रोस्ताड़नम्" नी०क०।

गदालक्षणन्तु हेमा० परि०ख० लक्षणसमुच्चये "गदा पञ्चा-शदङ्गुलायामा श्रेष्ठा, चत्वारिंशदङ्गुलायामा मध्या, त्रिंशदङ्गुलायामा कनिष्ठेत्यादि" अधिकं तत्रैव दृश्यम्। असुरभेदस्य गदस्यास्थिजातत्वात् विष्णुगदायास्तथात्वम्। यथा वायुपु० गयामा०५अ०। "गदो नामासुरो ह्यासीत् वज्राद्दृढतरो दृढः। प्रार्थितो ब्रह्मणे प्रादात् स्वशरीरास्थि दुस्त्यजम्। ब्रह्मोक्तो विश्वकर्म्मापि गदां चक्रेऽद्भुतां तदा। तदस्थ्ना वज्रनिष्पेषैः कुन्दैः स्वर्गेऽप्यधारयत्" तस्याश्च विष्णवे दानकथा गदाधरशब्दे वक्ष्यते अन्य गदानां तदाकृतित्वात्तथात्वम्। "मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वा-त्मिकां गदाम्" विष्णुस०भा०धृतवाक्यात् २बुद्धितत्त्वे च। गदाधरः गदाभृत्। ४पाटलावृक्षे शब्दच०।

**गदागद** पु० द्वि० व० गदमागच्छति आ+गम–ड गदागं रुग्णं दायतः शोधयतः दैप्–शोधने क। अश्विनीकुमा-रयोः त्रिका०।

**गदाग्रज** पु० गदस्याग्रजः। १बलरामे गदशब्दे बलरामस्य तथात्वं दृश्यम् २श्रीकृष्णे त्रिका०। तस्य वापत्न्यन्तभवत्वे-त्वेऽपि एकपितृकत्वेन तस्य गदतोऽग्रजत्वात् तथात्वम् "तथ्यामुतथ्यानुजवज्जगादाग्रे गदाग्रजम्" माघः।

**गदाग्रणी** पु० ६त०। १क्षयरोगे राजनि०। तस्य सर्वरोग-श्रेष्ठत्वात्तथात्वम्।

**गदाधर** पु० गदां धारयति धृ–अन्तर्भूतण्यर्थे अच्। १विष्णौ तस्य तद्धारणकथा वायुपु० गयामा० ५अ० गदाशब्ददर्शि वाक्ये गदानिर्म्माणमुक्त्वा "अथ कालेन महता मनौ स्वायम्भुवेऽन्तरे। हेतिरक्षो ब्रह्मपुत्रस्तपस्तेपे सुदारुणम्। दिव्यवर्षसहस्राणां शतं वायुमभक्षयत्। ऊर्द्ध्वमुख ऊर्द्ध्व-बाहुश्च पादाङ्गुष्ठभरेण हि। एकेनातिष्ठदव्यग्रः शीर्ण-पर्णानिलाशनः। ब्रह्मादींस्तपसा तुष्टान् वरं वव्रे वर-प्रदान्। दैवैर्दैत्यैश्च शस्त्रास्त्रैर्विविधैर्मनुजादिभिः। कृष्णे-शानस्य चक्राद्यैरवध्यः स्यां महाबलः। तथेत्युक्त्वान्त-र्हितास्ते हेतिर्देवानथाजयत्। इन्द्रत्वमकरोद्धेतिर्भीता ब्रह्महरादयः। हरिन्ते शरणं जग्मुहच्चुर्हेतिं जहीति तान्। ऊचे हरिरवध्योऽयं हेतिर्देवासुरैः सुराः। महास्त्रं मे प्रयच्छध्वम् हेतिं हन्मि हि येन तम्। इत्युक्तास्ते ततो देवा गदान्तां हरये ददुः। दधार तां गदामादौ दैवैरुक्तो गदाधरः। गदया हेतिमाहत्य देवेभ्यस्त्रिदिवं ददौ" वायुपु० गया० ५अ०। मनस्त-त्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदाम्। धारयन् लो-करक्षार्थमुक्तस्तस्मात्गदाधरः" विष्णुसह० भाष्यधृत-वाक्यात् लोकमर्य्यादारक्षार्थं बुद्धितत्त्वस्य प्रेरकत्वेन धारयितृत्वाद्वा तस्य तथात्वम्। "गदाधरं व्यपगत-कालकल्मषम्" वायुपु० विष्णुस्तवः। "शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः" विष्णुस०। "बुद्धितत्त्वा-